# .. sarasvatIstotram ..

# ॥ सरस्वतीस्तोत्रम् मार्कण्डयपुराणान्तर्गतम् ॥

## Document Information

```
Text title : sarasvatIstotram
File name : sarasvatIstotramArkaNDeya.itx
Location : doc_devii
Language : Sanskrit
Subject : philosophy/hinduism/religion
Proofread by : Venkata Sujatha Yellapragada sujathayv1968 at gmail.com
Description-comments : mArkaNDayapurANa adhyAya 23
Latest update : June 6, 2015
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org
```

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ सरस्वतीस्तोत्रम् मार्कण्डयपुराणान्तर्गतम् ॥

मार्कण्डयपुराणान्तर्गतम् अध्यायः २३

अश्वतर उवाच
जगद्धात्रीमहं देवीमारिराधयिषुः शुभाम् ।
स्तोष्ये प्रणम्य शिरसा ब्रह्मयोनिं सरस्वतीम् ॥ ३०॥

सदसद्देवि यत्किञ्चिन्मोक्षवच्चार्थवत्पदम् ।
तत्सर्वं त्वय्यसंयोगं योगवद्देवि ! संस्थितम् ॥ ३१॥

त्वमक्षरं परं देवि ! यत्र सर्वं प्रतिष्ठितम् ।
अक्षरं परमं देवि ! संस्थितं परमाणुवत् ॥ ३२॥

अक्षरं परमं ब्रह्म विश्वञ्चैतत् क्षरात्मकम् ।
दारुण्यवस्थितो वह्निर्भौमाश्च परमाणवः ॥ ३३॥

तथा त्वयि स्थितं ब्रह्म जगच्चेदमशेषतः ।
ॐकाराक्षरसंस्थानं यत्तु देवि ! स्थिरास्थिरम् ॥ ३४॥

तत्र मात्रात्रयं सर्वमस्ति यद्देवि नास्ति च ।
त्रयो लोकास्त्रयो वेदास्त्रैविद्यं पावकत्रयम् ॥ ३५॥

त्रीणि ज्योतींषि वर्णाश्च त्रयो धर्मागमस्तथा ।
त्रयो गुणास्त्रयः शब्दस्त्रयो वेदास्तथाश्रमाः ॥ ३६॥

त्रयः कालास्तथावस्थाः पितरोऽहर्निशादयः ।
एतन्मात्रात्रयं देवि ! तव रूपं सरस्वति ॥ ३७॥

विभिन्नदर्शिनामाद्या ब्रह्मणो हि सनातनाः ।
सोमसंस्था हविःसंस्थाः पाकसंस्थाश्च सप्त याः ॥ ३८॥

तात्वदुच्चारणाद्देवि ! क्रियन्ते ब्रह्मवादिभिः ।
अनिर्देश्यं तथा चान्यदर्धमात्रान्वितं परम् ॥ ३९॥

अविकार्यक्षयं दिव्यं परिणामविवर्जितम् ।
तवैतत्परमं रूपं यन्न शक्यं मयोदितुम् ॥ ४०॥

न चास्ये न च तज्जिह्वाताम्रोष्ठादिभिरुच्यते ।
इन्द्रोऽपि वसवो ब्रह्मा चन्द्रार्कौ ज्योतिरेव च ॥ ४१॥

विश्वावासं विश्वरूपं विश्वेशं परमेश्वरम् ।
साङ्ख्यवेदान्तवादोक्तं बहुशाखास्थिरीकृतम् ॥ ४२॥

अनादिमध्यनिधनं सदसन्न सदेव यत् ।

एकन्त्वनेकं नाप्येकं भवभेदसमाश्रितम् ॥ ४३॥

अनाख्यं षड्गुणाख्यञ्च वर्गाख्यं त्रिगुणाश्रयम् ।
नानाशक्तिमतामेकं शक्तिवैभविकं परम् ॥ ४४॥

सुखासुखं महासौख्यरूपं त्वयि विभाव्यते ।
एवं देवि ! त्वया व्याप्तं सकलं निष्कलञ्च यत् ।
अद्वैतावस्थितं ब्रह्म यच्च द्वैते व्यवस्थितम् ॥ ४५॥

येऽर्था नित्या ये विनश्यन्ति चान्ये ये वा स्थूला ये च सूक्ष्मातिसूक्ष्माः ।
ये वा भूमौ येऽन्तरीक्षेऽन्यतो वा तेषां तेषां त्वत्त एवोपलब्धिः ॥ ४६॥

यच्चामूर्तं यच्च मूर्तं समस्तं यद्वा भूतेष्वेकमेकञ्च किञ्चित् ।
यद्दिव्यस्ति क्ष्मातले खेऽन्यतो वा त्वत्सम्बन्धं त्वत्स्वरैर्व्यञ्जनैश्च ॥ ४७ ॥

Proofread by Venkata Sujatha Yellapragada sujathayv1968 at gmail.com

.. sarasvatIstotram ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*